# Durga Stotram

## Shri Kubjika Varnana Stotram

नीलोत्पलदलश्यामा षड्वक्त्रा षट्शकारिका ।

चिच्छक्तिरष्टादशाख्या बाहुद्वादशसम्युता ॥ १ ॥

*nilōtpaladalaśyāmā ṣadvaktrā ṣaṭprakārikā |*

*cicchaktiraṣtādaśākhyā bāhudvādaśasamyutā || 1 ||*

सिंहासनसुखासीना प्रेतपद्मोपरिस्थिता ।

कुलकोटिसहस्राढ्या कर्कोटो मेखलास्थितः ॥ २ ॥

*simhāsanasukhāsīnā prētapadmōparisthitā |*

*kulakōṭisahasrādhyā karkötő mēkhalāsthitaḥ || 2 ||*

तक्षकेणोपरिष्टाच्च गले हारश्च वासुकिः ।

कुलिकः कर्णयोर्यस्याः कूर्मः कुण्डलमण्डलः ॥ ३ ॥

*takşakēṇopariṣtācca galē hārasca vāsukiḥ |*

*kulikaḥ karṇayoryasyāḥ kūrmaḥ kuṇdalamandalaḥ || 3 ||*

भ्रुवोः पद्मो महापद्मो वामे नागः कपालकः |

अक्षसूत्रं च खट्वाङ्गं शङ्ख पुस्तकं च दक्षिणे ॥ ४ ॥

*bhruvāḥ padmo mahāpadmo vāmē nāgaḥ kapālakaḥ |*

*akşasūtram ca khaṭvāngam sankham pustakam ca dakşiṇē || 4 ||*

त्रिशूलं दर्पणं खड्गं रत्नमालाङ्कुशं धनुः ।

श्वेतमूर्धं मुखं देव्या ऊर्ध्वश्वेतं तथाम् ॥ ५ ॥

triśūlam darpaṇaṁ khadgam ratnamālāṅkušam dhanuḥ |

svētamūrdham mukham dēvyā ārdhvaśvētam tathām || 5 ||

पूर्वास्यं पाण्डुरं क्रोधि दक्षिणं कृष्णवर्णकम् ।

हिमकुन्देन्दुभं सौम्यं ब्रह्मा पादतले स्थितः ॥ ६ ॥

pūrvāsyaṁ pāṇḍuraṁ krōdhi dakṣiṇam krṣṇavarṇakam |

himakundēndubham saumyam brahmā pādatalē sthitaḥ || 6 ||

विष्णुस्तु जघने रुद्रो हृदि कण्ठे तथेश्वरः ।

सदाशिवो ललाटे स्याच्छिवस्तस्योर्ध्वतः स्थितः ।

आपूर्णिता कुब्जिकैवं ध्येया पूजादिकर्मसु ॥ ७ ॥

viṣṇustu jaghanē rudro hṛdi kaṇṭhē tathēśvaraḥ |

sadāśivo lalāṭē syācchivastasyordhvataḥ sthitaḥ |

āghūrṇitā kubjikaivam dhyēyā pūjādikarmasu || 7 ||

इत्याग्नेये महापुराणे कुब्जिकापूजाकथनं नाम चतुश्चत्वारिंशदधिकशततमोऽध्याये कुब्जिका वर्णन स्तोत्रम् ।

ityāgnēyē mahāpurāṇē kubjikāpūjākathanam nāma catuścatvārimśadadhikaśatatamo:'dhyāyē kubjikā varṇana stotram |

## Kumari Stotram

जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणी ।

पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते ॥ १ ॥

jagatpūjyē jagadvandyē sarvaśaktisvarūpiṇī |

pūjāṁ gṛhāṇa kaumāri jaganmātarnamō:'stu tē || 1 ||

त्रिपुरां त्रिपुराधारां त्रिवर्गज्ञानरूपिणीम् ।

त्रैलोक्यवन्दितां देवीं त्रिमूर्तिं पूजयाम्यहम् ॥ २ ॥

*tripurāṁ tripurādhārāṁ trivargajñānarūpiṇīm |*

*trailōkyavanditāṁ dēvīṁ trimūrtiṁ pūjayāmyaham || 2 ||*

*कलात्मिकां कलातीतां कारुण्यहृदयां शिवाम् ।*

*कल्याणजननीं देवीं कल्याणीं पूजयाम्यहम् ॥ ३ ॥*

*kalātmikāṁ kalātītāṁ kāruṇyahr̥dayāṁ śivām |*

*kalyāṇajananīṁ dēvīṁ kalyāṇīṁ pūjayāmyaham || 3 ||*

*अणिमादिगुणाधरा-मकाराद्यक्षरात्मिकाम् ।*

*अनन्तशक्तिकां लक्ष्मीं रोहिणीं पूजयाम्यहम् ॥ ४ ॥*

*aṇimādiguṇādharā-makārādyakṣarātmikām |*

*anantaśaktikāṁ lakṣmīṁ rōhiṇīṁ pūjayāmyaham || 4 ||*

*कामचारीं शुभां कान्तां कालचक्रस्वरूपिणीम् ।*

*कामदां करुणोदारां कालिकां पूजयाम्यहम् ॥ ५ ॥*

*kāmacārīṁ śubhāṁ kāntāṁ kālacakrasvarūpiṇīm |*

*kāmadāṁ karuṇōdārāṁ kālikāṁ pūjayāmyaham || 5 ||*

*चण्डवीरां चण्डमायां चण्डमुण्डप्रभञ्जिनीम् ।*

*पूजयामि सदा देवीं चण्डिकां चण्डविक्रमाम् ॥ ६ ॥*

*caṇḍavīrāṁ caṇḍamāyāṁ caṇḍamuṇḍaprabhañjinīm |*

*pūjayāmi sadā dēvīṁ caṇḍikāṁ caṇḍavikramām || 6 ||*

*सदानन्दकरीं शान्तां सर्वदेवनमस्कृताम् ।*

*सर्वभूतात्मिकां लक्ष्मीं शाम्भवीं पूजयाम्यहम् ॥ ७ ॥*

*sadānandakarīṁ śāntāṁ sarvadēvanamaskr̥tām |*

*sarvabhūtātmikāṁ lakṣmīṁ śāmbhavīṁ pūjayāmyaham || 7 ||*

*दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनीम् ।*

पूजयामि सदा भक्त्या दुर्गां दुर्गार्तिनाशिनीम् ॥ ८ ॥

*durgamē dustarē kāryē bhavaduḥkhavināśinīm |*

*pūjayāmi sadā bhaktyā durgāṁ durgārtināśinīm || 8 ||*

सुन्दरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीम् ।

सुभद्रा जननीं देवीं सुभद्रां पूजयाम्यहम् ॥ ९ ॥

*sundarīṁ svarṇavarṇābhāṁ sukhasaubhāgyadāyinīm |*

*subhadrā jananīṁ dēvīṁ subhadrāṁ pūjayāmyaham || 9 ||*

इति श्री कुमारी स्तोत्रम् ।

*iti śrī kumārī stōtram |*

## Sri Tulja Bhavani Stotram

नमोऽस्तु ते महादेवि शिवे कल्याणि शाम्भवि।

प्रसीद वेदविनुते जगदम्ब नमोऽस्तु ते॥१॥

*namo:'stu tē mahādēvi śivē kalyāṇi śāmbhavi |*

*prasīda vēdavinutē jagadamba namo:'stu tē || 1 ||*

जगतामादिभूता त्वं जगत्त्वं जगदाश्रया।

एकाऽप्यनेकरूपासि जगदम्ब नमोऽस्तु ते॥२॥

*jagatāmādibhūtā tvam jagattvam jagadāśrayā |*

*ēkā:'pyanēkarūpāsi jagadamba namo:'stu tē || 2 ||*

सृष्टिस्थितिविनाशानां हेतुभूते मुनिस्तुते।

प्रसीद देवविनुते जगदम्ब नमोऽस्तु ते॥३॥

*sṛṣṭisthitivināśānāṁ hētubhūtē munistutē |*

*prasīda dēvavinutē jagadamba namo:'stu tē || 3 ||*

सर्वेश्वरि नमस्तुभ्यं सर्वसौभाग्यदायिनि।

सर्वशक्तियुतेऽनन्ते जगदम्ब नमोऽस्तु ते॥४॥

*sarvēsvari namastubhyam sarvasaubhāgyadāyini |*

*sarvaśaktiyutē:'nantē jagadamba namo:'stu tē || 4 ||*

विविधारिष्टशमनि त्रिविधोत्पातनाशिनि।

प्रसीद देवि ललिते जगदम्ब नमोऽस्तु ते॥५॥

*vividhāriṣṭaśamani trividhotpātanāśini |*

*prasīda dēvi lalitē jagadamba namo:'stu tē || 5 ||*

प्रसीद करुणासिन्धो त्वत्तः कारुणिका परा।

यतो नास्ति महादेवि जगदम्ब नमोऽस्तु ते॥६॥

*prasīda karuṇāsindho tvattaḥ kāruṇikā parā |*

*yatā nāsti mahādēvi jagadamba namo:'stu tē || 6 ||*

शत्रून् जहि जयं देहि सर्वान्कामांश्च देहि मे।

भयं नाशय रोगांश्च जगदम्ब नमोऽस्तु ते॥७॥

*satrūn jahi jayam dēhi sarvānkāmāmśca dēhi mē |*

*bhayam nāśaya rögāmśca jagadamba namo:'stu tē || 7 ||*

जगदम्ब नमोऽस्तु ते हिते जय शम्भोर्दयिते महामते।

कुलदेवि नमोऽस्तु ते सदा हृदि मे तिष्ठ यतोऽसि सर्वदा॥८॥

*jagadamba namor'stu tē hitē jaya sambhõrdayitē mahāmatē |*

*kuladēvi namo:'stu tē sadā hṭdi mē tiṣtha yato:'si sarvadā || 8 ||*

तुलजापुरवासिन्या देव्याः स्तोत्रमिदं परम्।

यः पठेत्प्रयतो भक्त्या सर्वान्कामान्स आप्नुयात्॥९॥

*tulajāpuravāsinyā dēvyāḥ stōtramidam param |*

*yaḥ pathētprayato bhaktyā sarvānkāmānsa āpnuyāt || 9 ||*

*इति श्रीमत्परमहंस परिव्राजकाचार्य श्रीवासुदेवानन्दसरस्वती विरचितं श्रीतुलजापुरवासिन्या देव्याः स्तोत्रम् सम्पूर्णम्।*

*iti śrīmatparamahamsa parivrājakācārya śrīvāsudēvānandasarasvati viracitam śrītulajāpuravāsinyā dēvyāḥ stotram sampūrṇam |*

## Durga Apaduddharaka Stotram

*नमस्ते शरण्ये शिवे सानुकम्पे*

*नमस्ते जगद्व्यापिके विश्वरूपे ।*

*नमस्ते जगद्वन्द्यपादारविन्दे*

*नमस्ते जगत्तारिणि त्राहि दुर्गे ॥१॥*

*Namaste Sharannye Shive Saanukampe*

*Namaste Jagad-Vyaapike Vishva-Ruupe |*

*Namaste Jagad-Vandya-Paada-Aravinde*

*Namaste Jagat-Taarinni Traahi Durge ||1||*

*नमस्ते जगच्चिन्त्यमानस्वरूपे*

*नमस्ते महायोगिविज्ञानरूपे ।*

*नमस्ते नमस्ते सदानन्द रूपे*

*नमस्ते जगत्तारिणि त्राहि दुर्गे ॥२॥*

*Namaste Jagac-Cintyamaana-Svaruupe*

*Namaste Mahaa-Yogi-Vijnyaana-Ruupe |*

*Namaste Namaste Sadaa-[Aa]nanda Ruupe*

*Namaste Jagat-Taarinni Traahi Durge ||2||*

*अनाथस्य दीनस्य तृष्णातुरस्य*

*भयार्तस्य भीतस्य बद्धस्य जन्तोः ।*

*त्वमेका गतिर्देवि निस्तारकर्त्री*

*नमस्ते जगत्तारिणि त्राहि दुर्गे ॥३॥*

*Anaathasya Diinasya Trssnna-[A]aturasya*

*Bhayaartasya Bhiitasya Baddhasya Jantoh |*

*Tvam-Ekaa Gatir-Devi Nistaara-Kartrii*

*Namaste Jagat-Taarinni Traahi Durge ||3||*

*अरण्ये रणे दारुणे शत्रुमध्ये*

*जले सङ्कटे राजगेहे प्रवाते ।*

*त्वमेका गतिर्देवि निस्तार हेतुर्*

*नमस्ते जगत्तारिणि त्राहि दुर्गे ॥४॥*

*Arannye Ranne Daarunne Shatru-Madhye*

*Jale Sangkatte Raaja-Gehe Pravaate |*

*Tvam-Ekaa Gatir-Devi Nistaara Hetur*

*Namaste Jagat-Taarinni Traahi Durge ||4||*

*अपारे महदुस्तरेऽत्यन्तघोरे*

*विपत् सागरे मज्जतां देहभाजाम् ।*

*त्वमेका गतिर्देवि निस्तारनौका*

*नमस्ते जगत्तारिणि त्राहि दुर्गे ॥५॥*

*Apaare Maha-Dustare-[A]tyanta-Ghore*

*Vipat Saagare Majjataam Dehabhaajaam |*

*Tvam-Ekaa Gatir-Devi Nistaara-Naukaa*

*Namaste Jagat-Taarinni Traahi Durge ||5||*

*नमश्चण्डिके चण्डोर्दण्डलीला*

*समुत्खण्डिता खण्डलाशेषशत्रोः ।*

*त्वमेका गतिर्विघ्नसन्दोहहर्त्री*

*नमस्ते जगत्तारिणि त्राहि दुर्गे ॥६॥*

*Namash-Cannddike Cannddor-Danndda-Liilaa*

*Samut-Khanndditaa Khannddala-Ashessa-Shatroh |*

*Tvam-Ekaa Gatir-Vighna-Sandoha-Hartrii*

*Namaste Jagat-Taarinni Traahi Durge ||6||*

*त्वमेका सदाराधिता सत्यवादि_*

*न्यनेकाखिलाऽक्रोधना क्रोधनिष्ठा ।*

*इडा पिङ्ला त्वं सुषुम्ना च नाडी*

*नमस्ते जगत्तारिणि त्राहि दुर्गे ॥७॥*

*Tvam-Ekaa Sadaa-[Aa]raadhitaa Satya-Vaadi_*

*Nya[i-A]neka-Akhilaa-Akrodhanaa Krodha-Nisstthaa |*

*Iddaa Pinglaa Tvam Sussumnaa Ca Naaddii*

*Namaste Jagat-Taarinni Traahi Durge ||7||*

*नमोदेवि दुर्गे शिवे भीमनादे*

*सदासर्वसिद्धिप्रदातृस्वरूपे ।*

*विभूतिः सतां कालरात्रिस्वरूपे*

*नमस्ते जगत्तारिणि त्राहि दुर्गे ॥८॥*

*Namo Devi Durge Shive Bhiima-Naade*

*Sadaa-Sarva-Siddhi-Pradaatr-Svaruupe |*

*Vibhuutih Sataam Kaalaraatri-Svaruupe*

*Namaste Jagat-Taarinni Traahi Durge ||8||*

*शरणमसि सुराणां सिद्धविद्याधराणां*

*मुनिमनुजपशूनां दस्युभिस्त्रासितानाम् ।*

*नृपतिगृहगतानां व्याधिभिः पीडितानां*

*त्वमसि शरणमेका देवि दुर्गे प्रसीद ॥९॥*

*Sharannam-Asi Suraannaam Siddha-Vidyaadharaannaam*

*Muni-Manuja-Pashuunaam Dasyubhis-Traasitaanaam |*

*Nrpati-Grha-Gataanaam Vyaadhibhih Piidditaanaam*

*Tvam-Asi Sharannam-Ekaa Devi Durge Prasiida ||9||*

*इदं स्तोत्रं मया प्रोक्तमापदुद्धारहेतुकम् ।*

*त्रिसन्ध्यमेकसन्ध्यं वा पठनाद्घोरसङ्कटात् ॥१०॥*

*Idam Stotram Mayaa Proktam-Aapad-Uddhaara-Hetukam |*

*Tri-Sandhyam-Eka-Sandhyam Vaa Patthanaad-Ghora-Sangkattaat ||10||*

*मुच्यते नात्र सन्देहो भुवि स्वर्गे रसातले ।*

*सर्वं वा श्लोकमेकं वा यः पठेद्भक्तिमान् सदा ॥११॥*

*Mucyate Na-Atra Sandeho Bhuvi Svarge Rasaatale |*

*Sarvam Vaa Shlokam-Ekam Vaa Yah Patthed-Bhaktimaan Sadaa ||11||*

*स सर्वं दुष्कृतं त्यक्त्वा प्राप्नोति परमं पदम् ।*

*पठनादस्य देवेशि किं न सिद्ध्यति भूतले ॥१२॥*

*Sa Sarvam Dusskrtam Tyaktvaa Praapnoti Paramam Padam |*

*Patthanaad-Asya Deveshi Kim Na Siddhyati Bhuutale ||12||*

***स्तवराजमिदं देवि संक्षेपात्कथितं मया ॥१३॥***

*Stava-Raajam-Idam Devi Samkssepaat-Kathitam Mayaa ||13||*

***॥ इति श्रीसिद्धेश्वरीतन्त्रे उमामहेश्वरसंवादे श्रीदुर्गापदुद्धारस्तोत्रं सम्पूर्णम् ॥***

*॥ Iti Shrii-Siddheshvarii-Tantre Umaa-Maheshvara-Samvaade Shrii-Durgaa-[A]pad-Uddhaara-Stotram Sampuurnnam ॥*